पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः ।
अन्तरागमने विद्यादनध्यायमहर्न्निशम् ॥
द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिञ्चाशुद्धामात्मानञ्चाशुचिं द्विजः ॥”
इति मानवे । ४ । १०१—१२७ ॥

नित्यानित्यवस्तुविवेकः, पुं, ( नित्यानित्ये वस्तुनी तयोर्व्विवेकः विवेचनम् । ) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । इति वेदान्तसारः ॥

नित्याभैरवी, स्त्री, ( नित्या तदाख्यया प्रसिद्धा भैरवी । ) भैरवीविशेषः । अस्या ध्यानादिकं षट्कूटाभैरवीध्यानादिवत् ॥ ध्यानं यथा,—
“बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम् ।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम् ॥
सुवर्णकलसाकारपीनोन्नतपयोधराम् ।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥”
दधतीमिति शेषः । इति तन्त्रसारः ॥ ( अस्या बीजं यथा, ‘हसकलरडैं’ ‘हसकलरडीं’ ‘हसकलरडौं’ ॥’)

निदं, क्ली, ( नेदतीति । निद कुत्सायाम् + “इगुपधज्ञेति ।” ३ । १ । १३५ । इति कः । ) विषम् । इति शब्दचन्द्रिका ॥

निदद्रुः, पुं, ( निदात् विषात् द्राति पलायते इति । द्रा + म्रगय्वादित्वात् कुप्रत्ययेन साधुः । ) मनुष्यः । इति शब्दचन्द्रिका ॥ ( निर्नास्ति दद्रु-र्यस्येति विग्रहे । दद्रुरोगरहिते, त्रि ॥ )

निदर्शनं, क्ली, ( निदृश्यतेऽनेनेति । नि + दृश् + ल्युट् । ) दृष्टान्तः । उदाहरणम् । यथा,—
“शक्तः प्राज्ञोऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ॥”
इति नानार्थटीकायां भरतः ॥
(“दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम् ॥ यथाग्निर्वायुना सहितः कोष्ठे वृद्धिङ्गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥” इत्युत्तरतन्त्रे पञ्च-षष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥ )

निदर्शना, स्त्री, (निदर्शयतीति । नि + दृश् + णिच् + ल्युः । टाप् । ) काव्यालङ्कारविशेषः । तस्य लक्षणम् ।
“अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम् ।
सदसद्वा निदर्श्येत यदि सा स्यान्निदर्शना ॥”
उदाहरणं यथा, दण्डी ।
“उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥”
( यथा च साहित्यदर्पणे । १० । ७० ।
“सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना । यथा,—
‘कोऽत्र भूमिवलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम् ।
वेदयन्निति दिनेन भानुमा-
नाससाद चरमाचलं ततः ॥’
अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्भवन्नेव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्ति-रूपधर्म्मवत्त्वात् । स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेक-वाक्यानेकवाक्यगतत्वेन द्विविधा । तत्रैकवाक्यगा यथा,—
‘कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः ।
अधरः किसलयलीला-
माननमस्याः कलानिधेर्व्विलासम् ॥’
अत्रान्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्ष-विक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिक-मवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति । यथा वा ।
‘प्रयाणे तव राजेन्द्र ! मुक्ता वैरीमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः ॥’
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागो-ऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते । स चासम्भवन् राजहंसगतिमिव गतिं बोधयति । अनेकवाक्यगा यथा,—
‘इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥’
अत्र यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयो-ऽनुपपद्यमानस्तादृशवपुषस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति । यथा वा ।
‘जन्मेदं बन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्म्मया ॥’
अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यव-सानम् । एवम् ।
‘क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥’
अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागर-तरणमिवेति पर्य्यवसानम् । इयं क्वचिदुपमेय-वृत्तस्योपमानेऽसम्भवेऽपि भवति । यथा,—
‘योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समास्वादि स मृद्वीकारसे रसविशारदैः ॥’
अत्र प्रकृतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षा-रसेऽसम्भवात् । पूर्व्ववत् साम्ये पर्य्यवसानम् । मालारूपापि यथा मम ।
‘क्षिपसि शुकं वृषदंशकवदने
मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे
निदधच्चेतो भोगविताने ॥’
इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्य्य-वसानम् । दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापीय-मर्थापत्तिस्तत्र ‘हारोऽयं हरिणाक्षीणाम् ।’ इत्यादौ साङ्कर्यपर्य्यवसानाभावात् ॥)

निदाघः, पुं, ( नितरां दह्यतेऽत्र अनेन वा । नि + दह + घञ् । न्यङ्क्वादित्वात् कुत्वम् । ) ग्रीष्म-कालः । ( यथा, रघुः । १० । ८३ ।
“ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥”)
उष्णः । घर्म्मः । इत्यमरमेदिनीकरौ ॥ ( यथा, रघुः । १२ । ३२ ।
“रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥”)
निदाघे वर्णनीयानि यथा । पाटलपुष्पम् १ मल्लिकापुष्पम् २ तापः ३ सरः ४ पथिकशोषः ५ वायुः ६ सेकः ७ शक्तुः ८ प्रपा ९ स्त्री १० मृग-तृष्णा ११ आम्रादिफलपाकः १२ । इति कवि-कल्पलता ॥
(“ता एवौषधयो निदाघे निःसारा रूक्षा अति-मात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्या-ल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वाति-कान् व्याधीन् जनयति ॥” इति सुश्रुते सूत्र-स्थाने षष्ठेऽध्याये ॥
“निदाघोपचितश्चैव प्रकुप्यन्तं समीरणम् ।
निहन्यादनिलघ्नेन विधिना विधिकोविदः ।
नदीजलं रूक्षमुष्णमुदमन्थं तथातपम् ॥
व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्ज्जयेत् ॥”
इति चोत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुते-नोक्तम् ॥ )

निदाघकरः, पुं, ( निदाघा उष्णाः करा किरणानि यस्य । निदाघस्य उष्णस्य करो वा । ) सूर्य्यः । इति हारावली । ११ ॥

निदाघकालः, पुं, ( निदाघ एव कालः । निदा-घस्य कालो वा । ) ग्रीष्मर्त्तुः । स तु ज्येष्ठा-षाढ़मासौ । यथा,—
“प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ! ॥”
इति ऋतुसंहारे । १ । १ ॥

निदानं, क्ली, ( नि निश्चयं दीयतेऽनेनेति । नि + दा + करणे ल्युट् । ) आदिकारणम् । इत्य-मरः । १ । ४ । २८ ॥ ( यथा, रघुः । ३ । १ ।
“निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥” )
कारणम् । वत्सदामादि । ( यथा, ऋग्वेदे । ६ । ३२ । २ ।
“उदुस्रियाणामसृजन्निदानम् ॥”
नि + दो छेदे + भावे ल्युट् । ) कारणक्षयः । इति मेदिनी । ने, ८३ ॥ (नि + दैप शोधने + भावे ल्युट् । ) शुद्धिः । तपःफलयाचनम् । अवसा-नम् । इति हेमचन्द्रः । ६ । १५० ॥ रोग-निर्णयः । इति विश्वः ॥ तत्पर्य्यायः । रोग-